नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्वमस्यादिलक्ष्यं ।
एकं नित्यं विमलमचलं सर्वधीसाक्षितभूतं
भावार्तीत त्रिगुणरहितं सद्गुरुं तं नमामि ॥

1) ॐ श्री शङ्कराचार्यवर्याय नमः
2) ॐ ब्रह्मानन्द–प्रदायकाय नमः
3) ॐ अज्ञान–तिमिरादित्याय नमः
4) ॐ सु ज्ञानांबुधि–चन्द्रमसे नमः
5) ॐ वर्णाश्रम प्रतिष्ठात्रे नमः
6) ॐ श्रीमते नमः
7) ॐ मुक्ति–प्रदायकाय नमः
8) ॐ शिष्योपदेश निरताय नमः
9) ॐ भक्ताभीष्ट प्रदायकाय नमः
10) ॐ सूक्ष्म–तत्त्व–रहस्य–ज्ञाय नमः
11) ॐ कार्याकार्य प्रबोधकाय नमः
12) ॐ ज्ञान–मुद्राञ्चित–कराय नमः
13) ॐ शिष्यहृत्ताप–हारकाय नमः
14) ॐ परिव्राजाश्रम–उद्धर्त्रे नमः
15) ॐ सर्व–तन्त्र–स्वतन्त्रधिये नमः
16) ॐ अद्वैत–स्थापना–चार्याय नमः
17) ॐ साक्षाच्छङ्कर रूपधृते नमः
18) ॐ षण्मत–स्थापना–चार्याय नमः
19) ॐ त्रयीमार्ग प्रकाशकाय नमः
20) ॐ वेदवेदान्त–तत्त्वज्ञाय नमः
21) ॐ दुर्वादिमत–खण्डनाय नमः
22) ॐ वैराग्य–निरताय नमः
23) ॐ शान्ताय नमः
24) ॐ संसारार्णव–तारकाय नमः
25) ॐ प्रसन्न–वदनांभोजाय नमः
26) ॐ परमार्थ–प्रकाशकाय नमः
27) ॐ पुराण–स्मृति–सारज्ञाय नमः
28) ॐ नित्यतृप्ताय नमः
29) ॐ महते नमः
30) ॐ शुचये नमः
31) ॐ नित्यानन्दाय नमः
32) ॐ निरातङ्काय नमः
33) ॐ निस्सङ्गाय नमः
34) ॐ निर्मलात्मकाय नमः

35) ॐ निर्ममाय नमः
36) ॐ निरहङ्काराय नमः
37) ॐ विश्ववन्द्य–पदांबुजाय नमः
38) ॐ सत्त्व–प्रधानाय नमः
39) ॐ सद्भावाय नमः
40) ॐ सङ्ख्यातीत–गुणोज्ज्वलाय नमः
41) ॐ अनघाय नमः
42) ॐ सार–हृदयाय नमः
43) ॐ सुधिये नमः
44) ॐ सारस्वत–प्रदाय नमः
45) ॐ सत्यात्मने नमः
46) ॐ पुण्यशीलाय नमः
47) ॐ सांख्ययोग–विचक्षणाय नमः
48) ॐ तपोराशये नमः
49) ॐ महातेजसे नमः
50) ॐ गुणत्रय–विभाग–विदे नमः
51) ॐ कलिघ्नाय नमः
52) ॐ कालकर्मज्ञाय नमः
53) ॐ तमोगुण–निवारकाय नमः
54) ॐ भगवते नमः
55) ॐ भारतीजेत्रे नमः
56) ॐ शारदाह्वान–पण्डिताय नमः

57) ॐ धर्माधर्म–विभागज्ञाय नमः
58) ॐ लक्ष्यभेद–प्रदर्शकाय नमः
59) ॐ नादबिन्दुकला–भिज्ञाय नमः
60) ॐ योगिहृत्पद्म–भास्कराय नमः
61) ॐ अतीन्द्रिय ज्ञाननिधये नमः
62) ॐ नित्यानित्य–विवेकवते नमः
63) ॐ चिदानन्दाय नमः
64) ॐ चिन्मयात्मने नमः
65) ॐ परकाय–प्रवेशकृते नमः
66) ॐ अमानुष–चरित्राढ्याय नमः
67) ॐ क्षेमदायिने नमः
68) ॐ क्षमाकराय नमः
69) ॐ भव्याय नमः
70) ॐ भद्रप्रदाय नमः
71) ॐ भूरिमहिम्ने नमः
72) ॐ विश्वरञ्जकाय नमः
73) ॐ स्वप्रकाशाय नमः
74) ॐ सदाधाराय नमः
75) ॐ विश्वबन्धवे नमः
76) ॐ शुभोदयाय नमः
77) ॐ विशाल कीर्तये नमः
78) ॐ वागीशाय नमः

79) ॐ सर्वलोक–हितोत्सुकाय नमः
80) ॐ कैलासयात्रा संप्राप्त चन्द्रमौलि–
प्रपूजकाय नमः
81) ॐ काञ्च्यां श्रीचक्र राजाख्य यन्त्र
स्थापन दीक्षिताय नमः
82) ॐ श्रीचक्रात्मक ताटङ्क तोषितांबा
मनोरथाय नमः
83) ॐ श्री ब्रह्मसूत्रोपनिषद् भाष्यादि
ग्रन्थकल्पकाय नमः
84) ॐ चतुर्दिक् चतुराम्नाय प्रतिष्ठात्रे नमः
85) ॐ महामतये नमः
86) ॐ द्विसप्तति मतोच्छेत्त्रे नमः
87) ॐ सर्व–दिग्विजय प्रभवे नमः
88) ॐ काषाय–वसनोपेताय नमः
89) ॐ भस्मोद्धूळित विग्रहाय नमः
90) ॐ ज्ञानात्मकैक–दण्डाढ्याय नमः
91) ॐ कमण्डलु–लसत्कराय नमः
92) ॐ गुरु–भूमण्डलाचार्याय नमः
93) ॐ भगवत्पाद संज्ञकाय नमः
94) ॐ व्यास–संदर्शन प्रीताय नमः
95) ॐ ऋष्यशृङ्ग–पुरेश्वराय नमः
96) ॐ सौन्दर्यलहरी मुख्य बहुस्तोत्र
विधायकाय नमः
97) ॐ चतुष्षष्टि कलाभिज्ञाय नमः
98) ॐ ब्रह्मराक्षस–मोक्षदाय नमः
99) ॐ श्रीमन्–मण्डनमिश्राख्य स्वयंभू
जय–सन्नुताय नमः
100) ॐ तोटकाचार्य सम्पूज्याय नमः
101) ॐ पद्मपाद–अर्चिताङ्घ्रिकाय नमः
102) ॐ हस्तामलक योगीन्द्र ब्रह्मज्ञान
प्रदायकाय नमः
103) ॐ सुरेश्वराख्य सच्छिष्य सन्यासाश्रम
दायकाय नमः
104) ॐ नृसिंहभक्ताय नमः
105) ॐ सद्रत्नगर्भ–हेरंब पूजकाय नमः
106) ॐ व्याख्या सिंहासनाधीशाय नमः
107) ॐ जगत्पूज्याय नमः
108) ॐ श्रीजगद्गुरवे नमः

श्रीमत् शङ्करभगवत् पादाचार्य स्वामिने नमः